॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ५६

ततस्तस्य गिरेः शृङ्गे महेन्द्रस्य महाबलाः ।
हनुमत्प्रमुखाः प्रीतिं हरयो जग्मुरुत्तमाम् ॥ १॥

तं ततः प्रतिसंहृष्टः प्रीतिमन्तं महाकपिम् ।
जाम्बवान्कार्यवृत्तान्तमपृच्छदनिलात्मजम् ॥ २॥

कथं दृष्टा त्वया देवी कथं वा तत्र वर्तते ।
तस्यां वा स कथं वृत्तः क्रूरकर्मा दशाननः ॥ ३॥

तत्त्वतः सर्वमेतन्नः प्रब्रूहि त्वं महाकपे ।
श्रुतार्थाश्चिन्तयिष्यामो भूयः कार्यविनिश्चयम् ॥ ४॥

यश्चार्थस्तत्र वक्तव्यो गतैरस्माभिरात्मवान् ।
रक्षितव्यं च यत्तत्र तद्भवान्व्याकरोतु नः ॥ ५॥

स नियुक्तस्ततस्तेन सम्प्रहृष्टतनूरुहः ।
नमस्यञ्शिरसा देव्यै सीतायै प्रत्यभाषत ॥ ६॥

प्रत्यक्षमेव भवतां महेन्द्राग्रात्खमास्थितः ।
उदधेर्दक्षिणं पारं काङ्क्षमाणः समाहितः ॥ ७॥

गच्छतश्च हि मे घोरं विघ्नरूपमिवाभवत् ।
काञ्चनं शिखरं दिव्यं पश्यामि सुमनोहरम् ॥ ८॥

स्थितं पन्थानमावृत्य मेने विघ्नं च तं नगम् ॥ ९॥

उपसङ्गम्य तं दिव्यं काञ्चनं नगसत्तमम् ।
कृता मे मनसा बुद्धिर्भेत्तव्योऽयं मयेति च ॥ १०॥

प्रहतं च मया तस्य लाङ्गूलेन महागिरेः ।
शिखरं सूर्यसङ्काशं व्यशीर्यत सहस्रधा ॥ ११॥

व्यवसायं च मे बुद्ध्वा स होवाच महागिरिः ।
पुत्रेति मधुरां वाणीं मनःप्रह्लादयन्निव ॥ १२॥

पितृव्यं चापि मां विद्धि सखायं मातरिश्वनः ।
मैनाकमिति विख्यातं निवसन्तं महोदधौ ॥ १३॥

पक्ष्ववन्तः पुरा पुत्र बभूवुः पर्वतोत्तमाः ।
छन्दतः पृथिवीं चेरुर्बाधमानाः समन्ततः ॥ १४॥

श्रुत्वा नगानां चरितं महेन्द्रः पाकशासनः ।
चिच्छेद भगवान्पक्षान्वज्रेणैषां सहस्रशः ॥ १५॥

अहं तु मोक्षितस्तस्मात्तव पित्रा महात्मना ।
मारुतेन तदा वत्स प्रक्षिप्तोऽस्मि महार्णवे ॥ १६॥

रामस्य च मया साह्ये वर्तितव्यमरिन्दम ।
रामो धर्मभृतां श्रेष्ठो महेन्द्रसमविक्रमः ॥ १७॥

एतच्छ्रुत्वा मया तस्य मैनाकस्य महात्मनः ।
कार्यमावेद्य तु गिरेरुद्धृतं च मनो मम ॥ १८॥

तेन चाहमनुज्ञातो मैनाकेन महात्मना ।
उत्तमं जवमास्थाय शेषमध्वानमास्थितः ॥ १९॥

ततोऽहं सुचिरं कालं वेगेनाभ्यगमं पथि ।
ततः पश्याम्यहं देवीं सुरसां नागमातरम् ॥ २०॥

समुद्रमध्ये सा देवी वचनं मामभाषत ।
मम भक्ष्यः प्रदिष्टस्त्वममारैर्हरिसत्तमम् ।
ततस्त्वां भक्षयिष्यामि विहितस्त्वं चिरस्य मे ॥ २१॥

एवमुक्तः सुरसया प्राञ्जलिः प्रणतः स्थितः ।
विवर्णवदनो भूत्वा वाक्यं चेदमुदीरयम् ॥ २२॥

रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ।
लक्ष्मणेन सह भ्रात्रा सीतया च परन्तपः ॥ २३॥

तस्य सीता हृता भार्या रावणेन दुरात्मना ।
तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् ॥ २४॥

कर्तुमर्हसि रामस्य साह्यं विषयवासिनि ॥ २५॥

अथ वा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् ।
आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोति मे ॥ २६॥

एवमुक्ता मया सा तु सुरसा कामरूपिणी ।
अब्रवीन्नातिवर्तेत कश्चिदेष वरो मम ॥ २७॥

एवमुक्तः सुरसया दशयोजनमायतः ।
ततोऽधंगुणविस्तारो बभूवाहं क्षणेन तु ॥ २८॥

मत्प्रमाणानुरूपं च व्यादितं तन्मुखं तया ।
तदृष्ट्वा व्यादितं त्वास्यं ह्रस्वं ह्यकरवं वपुः ॥ २९॥

तस्मिन्मुहूर्ते च पुनर्बभूवाङ्गुष्ठसंमितः ।
अभिपत्याशु तद्वक्त्रं निर्गतोऽहं ततः क्षणात् ॥ ३०॥

अब्रवीत्सुरसा देवी स्वेन रूपेण मां पुनः ।
अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् ॥ ३१॥

समानय च वैदेहीं राघवेण महात्मना ।
सुखी भव महाबाहो प्रीतास्मि तव वानर ॥ ३२॥

ततोऽहं साधु साध्वीति सर्वभूतैः प्रशंसितः ।
ततोऽन्तरिक्षं विपुलं प्लुतोऽहं गरुडो यथा ॥ ३३॥

छाया मे निगृहीता च न च पश्यामि किं चन ।
सोऽहं विगतवेगस्तु दिशो दश विलोकयन् ।
न किं चित्तत्र पश्यामि येन मेऽपहृता गतिः ॥ ३४॥

ततो मे बुद्धिरुत्पन्ना किं नाम गमने मम ।
ईदृशो विघ्न उत्पन्नो रूपं यत्र न दृश्यते ॥ ३५॥

अधो भागेन मे दृष्टिः शोचता पातिता मया ।
ततोऽद्राक्षमहं भीमां राक्षसीं सलिले शयाम् ॥ ३६॥

प्रहस्य च महानादमुक्तोऽहं भीमया तया ।
अवस्थितमसम्भ्रान्तमिदं वाक्यमशोभनम् ॥ ३७॥

क्वासि गन्ता महाकाय क्षुधिताया ममेप्सितः ।
भक्षः प्रीणय मे देहं चिरमाहारवर्जितम् ॥ ३८॥

बाढमित्येव तां वाणीं प्रत्यगृह्णामहं ततः ।
आस्य प्रमाणादधिकं तस्याः कायमपूरयम् ॥ ३९॥

तस्यास्यास्यं महद्भीमं वर्धते मम भक्षणे ।
न च मां सा तु बुबुधे मम वा विकृतं कृतम् ॥ ४०॥

ततोऽहं विपुलं रूपं सङ्क्षिप्य निमिषान्तरात् ।
तस्या हृदयमादाय प्रपतामि नभस्तलम् ॥ ४१॥

सा विसृष्टभुजा भीमा पपात लवणाम्भसि ।
मया पर्वतसङ्काशा निकृत्तहृदया सती ॥ ४२॥

शृणोमि खगतानां च सिद्धानां चारणैः सह ।
राक्षसी सिंहिका भीमा क्षिप्रं हनुमता हृता ॥ ४३॥

तां हत्वा पुनरेवाहं कृत्यमात्ययिकं स्मरन् ।
गत्वा च महदध्वानं पश्यामि नगमण्डितम् ।
दक्षिणं तीरमुदधेर्लङ्का यत्र च सा पुरी ॥ ४४॥

अस्तं दिनकरे याते रक्षसां निलयं पुरीम् ।
प्रविष्टोऽहमविज्ञातो रक्षोभिर्भीमविक्रमैः ॥ ४५॥

तत्राहं सर्वरात्रं तु विचिन्वञ्जनकात्मजाम् ।
रावणान्तःपुरगतो न चापश्यं सुमध्यमाम् ॥ ४६॥

ततः सीतामपश्यंस्तु रावणस्य निवेशने ।
शोकसागरमासाद्य न पारमुपलक्षये ॥ ४७॥

शोचता च मया दृष्टं प्राकारेण समावृतम् ।
काञ्चनेन विकृष्टेन गृहोपवनमुत्तमम् ॥ ४८॥

स प्राकारमवप्लुत्य पश्यामि बहुपादपम् ॥ ४९॥

अशोकवनिकामध्ये शिंशपापादपो महान् ।
तमारुह्य च पश्यामि काञ्चनं कदली वनम् ॥ ५०॥

अदूराच्छिंशपावृक्षात्पश्यामि वनवर्णिनीम् ।
श्यामां कमलपत्राक्षीमुपवासकृशाननाम् ॥ ५१॥

राक्षसीभिर्विरूपाभिः क्रूराभिरभिसंवृताम् ।
मांसशोणितभक्ष्याभिर्व्याघ्रीभिर्हरिणीं यथा ॥ ५२॥

तां दृष्ट्वा तादृशीं नारीं रामपत्नीमनिन्दिताम् ।
तत्रैव शिंशपावृक्षे पश्यन्नहमवस्थितः ॥ ५३॥

ततो हलहलाशब्दं काञ्चीनूपुरमिश्रितम् ।
शृणोम्यधिकगम्भीरं रावणस्य निवेशने ॥ ५४॥

ततोऽहं परमोद्विग्नः स्वरूपं प्रत्यसंहरम् ।
अहं च शिंशपावृक्षे पक्षीव गहने स्थितः ॥ ५५॥

ततो रावणदाराश्च रावणश्च महाबलः ।
तं देशं समनुप्राप्ता यत्र सीताभवत्स्थिता ॥ ५६॥

तं दृष्ट्वाथ वरारोहा सीता रक्षोगणेश्वरम् ।

सङ्कुच्योरू स्तनौ पीनौ बाहुभ्यां परिरभ्य च ॥ ५७ ॥

तामुवाच दशग्रीवः सीतां परमदुःखिताम् ।
अवाक्षिराः प्रपतितो बहु मन्यस्व माम् इति ॥ ५८ ॥

यदि चेत्त्वं तु मां दर्पान्नाभिनन्दसि गर्विते ।
द्विमासानन्तरं सीते पास्यामि रुधिरं तव ॥ ५९ ॥

एतच्छ्रुत्वा वचस्तस्य रावणस्य दुरात्मनः ।
उवाच परमक्रुद्धा सीता वचनमुत्तमम् ॥ ६० ॥

राक्षसाधम रामस्य भार्यामिततेजसः ।
इक्ष्वाकुकुलनाथस्य सुषां दशरथस्य च ।
अवाच्यं वदतो जिह्वा कथं न पतिता तव ॥ ६१ ॥

किंस्विद्वीर्यं तवानार्य यो मां भर्तुरसंनिधौ ।
अपहृत्यागतः पाप तेनादृष्टो महात्मना ॥ ६२ ॥

न त्वं रामस्य सदृशो दास्येऽप्यस्या न युज्यसे ।
यज्ञीयः सत्यवाक्चैव रणश्लाघी च राघवः ॥ ६३ ॥

जानक्या परुषं वाक्यमेवमुक्तो दशाननः ।
जज्वाल सहसा कोपाच्चितास्थ इव पावकः ॥ ६४ ॥

विवृत्य नयने क्रूरे मुष्टिमुद्यम्य दक्षिणम् ।
मैथिलीं हन्तुमारब्धः स्त्रीभिर्हाहाकृतं तदा ॥ ६५ ॥

स्त्रीणां मध्यात्समुत्पत्य तस्य भार्या दुरात्मनः ।
वरा मन्दोदरी नाम तया स प्रतिषेधितः ॥ ६६ ॥

उक्तश्च मधुरां वाणीं तया स मदनार्दितः ।
सीतया तव किं कार्यं महेन्द्रसमविक्रम ।
मया सह रमस्वाद्य मद्विशिष्टा न जानकी ॥ ६७ ॥

देवगन्धर्वकन्याभिर्यक्षकन्याभिरेव च ।
सार्धं प्रभो रमस्वेह सीतया किं करिष्यसि ॥ ६८ ॥

ततस्ताभिः समेताभिर्नारीभिः स महाबलः ।
उत्थाप्य सहसा नीतो भवनं स्वं निशाचरः ॥ ६९ ॥

याते तस्मिन्दशग्रीवे राक्षस्यो विकृताननाः ।
सीतां निर्भर्त्सयामासुर्वाक्यैः क्रूरैः सुदारुणैः ॥ ७० ॥

तृणवद्भाषितं तासां गणयामास जानकी ।
तर्जितं च तदा तासां सीतां प्राप्य निरर्थकम् ॥ ७१ ॥

वृथागर्जितनिश्चेष्टा राक्षस्यः पिशिताशनाः ।
रावणाय शशंसुस्ताः सीताव्यवसितं महत् ॥ ७२ ॥

ततस्ताः सहिताः सर्वा विहताशा निरुद्यमाः ।
परिक्षिप्य समन्तात्तां निद्रावशमुपागताः ॥ ७३ ॥

तासु चैव प्रसुप्तासु सीता भर्तृहिते रता ।
विलप्य करुणं दीना प्रशुशोच सुदुःखिता ॥ ७४ ॥

तां चाहं तादृशीं दृष्ट्वा सीताया दारुणां दशाम् ।
चिन्तयामास विश्रान्तो न च मे निर्वृतं मनः ॥ ७५ ॥

सम्भाषणार्थे च मया जानक्याश्चिन्तितो विधिः ।
इक्ष्वाकुकुलवंशस्तु ततो मम पुरस्कृतः ॥ ७६ ॥

श्रुत्वा तु गदितां वाचं राजर्षिगणपूजिताम् ।
प्रत्यभाषत मां देवी बाष्पैः पिहितलोचना ॥ ७७ ॥

कस्त्वं केन कथं चेह प्राप्तो वानरपुङ्गव ।
का च रामेण ते प्रीतिस्तन्मे शंसितुमर्हसि ॥ ७८ ॥

तस्यास्तद्वचनं श्रुत्वा अहमप्यब्रुवं वचः ।
देवि रामस्य भर्तुस्ते सहायो भीमविक्रमः ।
सुग्रीवो नाम विक्रान्तो वानरेन्दो महाबलः ॥ ७९ ॥

तस्य मां विद्धि भृत्यं त्वं हनूमन्तमिहागतम् ।
भर्त्राहं प्रहितस्तुभ्यं रामेणाक्लिष्टकर्मणा ॥ ८० ॥

इदं च पुरुषव्याघ्रः श्रीमान्दाशरथिः स्वयम् ।
अङ्गुलीयमभिज्ञानमदात्तुभ्यं यशस्विनि ॥ ८१ ॥

तदिच्छामि त्वयाज्ञप्तं देवि किं करवाण्यहम् ।
रामलक्ष्मणयोः पार्श्वं नयामि त्वां किमुत्तरम् ॥ ८२ ॥

एतच्छ्रुत्वा विदित्वा च सीता जनकनन्दिनी ।
आह रावणमुत्साद्य राघवो मां नयत्विति ॥ ८३ ॥

प्रणम्य शिरसा देवीमहमार्यामनिन्दिताम् ।
राघवस्य मनोह्लादमभिज्ञानमयाचिषम् ॥ ८४ ॥

एवमुक्ता वरारोहा मणिप्रवरमुत्तमम् ।
प्रायच्छत्परमोद्विग्ना वाचा मां सन्दिदेश ह ॥ ८५ ॥

ततस्तस्यै प्रणम्याहं राजपुत्र्यै समाहितः ।
प्रदक्षिणं परिक्रामामिहाभ्युद्गतमानसः ॥ ८६ ॥

उत्तरं पुनरेवाह निश्चित्य मनसा तदा ।
हनूमन्मम वृत्तान्तं वक्तुमर्हसि राघवे ॥ ८७ ॥

यथा श्रुत्वैव नचिरात्तावुभौ रामलक्ष्मणौ ।
सुग्रीवसहितौ वीरावुपेयातां तथा कुरु ॥ ८८ ॥

यद्यन्यथा भवेदेतद्द्वौ मासौ जीवितं मम ।
न मां द्रक्ष्यति काकुत्स्थो म्रिये साहमनाथवत् ॥ ८९ ॥

तच्छ्रुत्वा करुणं वाक्यं क्रोधो माम् अभ्यवर्तत ।
उत्तरं च मया दृष्टं कार्यशेषमनन्तरम् ॥ ९० ॥

ततोऽवर्धत मे कायस्तदा पर्वतसंनिभः ।
युद्धकाङ्क्षी वनं तच्च विनाशयितुमारभे ॥ ९१ ॥

तद्भग्नं वनषण्डं तु भ्रान्तत्रस्तमृगद्विजम् ।
प्रतिबुद्धा निरीक्षन्ते राक्षस्यो विकृताननाः ॥ ९२ ॥

मां च दृष्टवा वने तस्मिन्समागम्य ततस्ततः ।
ताः समभ्यागताः क्षिप्रं रावणायाचचक्षिरे ॥ ९३ ॥

राजन्वनमिदं दुर्गं तव भग्नं दुरात्मना ।
वानरेण ह्यविज्ञाय तव वीर्यं महाबल ॥ ९४ ॥

दुर्बुद्धेस्तस्य राजेन्द्र तव विप्रियकारिणः ।
वधमाज्ञापय क्षिप्रं यथासौ विलयं व्रजेत् ॥ ९५ ॥

तच्छ्रुत्वा राक्षसेन्द्रेण विसृष्टा भृशदुर्जयाः ।
राक्षसाः किङ्करा नाम रावणस्य मनोऽनुगाः ॥ ९६ ॥

तेषामशीतिसाहस्रं शूलमुद्गरपाणिनाम् ।
मया तस्मिन्वनोद्देशे परिघेण निषूदितम् ॥ ९७ ॥

तेषां तु हतशेषा ये ते गता लघुविक्रमाः ।
निहतं च मया सैन्यं रावणायाचचक्षिरे ॥ ९८ ॥

ततो मे बुद्धिरुत्पन्ना चैत्यप्रासादमाक्रमम् ॥ ९९ ॥

तत्रस्थान्राक्षसान्हत्वा शतं स्तम्भेन वै पुनः ।
ललाम भूतो लङ्काया मया विध्वंसितो रुषा ॥ १०० ॥

ततः प्रहस्तस्य सुतं जम्बुमालिनमादिशत् ॥ १०१ ॥

तमहं बलसम्पन्नं राक्षसं रणकोविदम् ।
परिघेणातिघोरेण सूदयामि सहानुगम् ॥ १०२ ॥

तच्छ्रुत्वा राक्षसेन्द्रस्तु मन्त्रिपुत्रान्महाबलान् ।
पदातिबलसम्पन्नान्प्रेषयामास रावणः ।
परिघेणैव तान्सर्वान्नयामि यमसादनम् ॥ १०३ ॥

मन्त्रिपुत्रान्हृताञ्श्रुत्वा समरे लघुविक्रमान् ।
पञ्चसेनाग्रगाञ्शूरान्प्रेषयामास रावणः ।
तानहं सह सैन्यान्वै सर्वानेवाभ्यसूदयम् ॥ १०४ ॥

ततः पुनर्दशग्रीवः पुत्रमक्षं महाबलम् ।
बहुभी राकसैः सार्धं प्रेषयामास संयुगे ॥ १०५ ॥

तं तु मन्दोदरी पुत्रं कुमारं रणपण्डितम् ।
सहसा खं समुत्क्रान्तं पादयोश्च गृहीतवान् ।
चर्मासिनं शतगुणं भ्रामयित्वा व्यपेषयम् ॥ १०६ ॥

तमक्षमागतं भग्नं निशम्य स दशाननः ।
तत इन्द्रजितं नाम द्वितीयं रावणः सुतम् ।
व्यादिदेश सुसङ्क्रुद्धो बलिनं युद्धदुर्मदम् ॥ १०७ ॥

तस्याप्यहं बलं सर्वं तं च राक्षसपुङ्गवम् ।
नष्टौजसं रणे कृत्वा परं हर्षमुपागमम् ॥ १०८ ॥

महता हि महाबाहुः प्रत्ययेन महाबलः ।
प्रेषितो रावणेनैष सह वीरैर्मदोत्कटैः ॥ १०९ ॥

ब्राह्मेणास्त्रेण स तु मां प्रबध्नात्वातिवेगतः ।
रज्जूभिरभिबध्नन्ति ततो मां तत्र राक्षसाः ॥ ११० ॥

रावणस्य समीपं च गृहीत्वा मामुपानयन् ।
दृष्टवा सम्भाषितश्चाहं रावणेन दुरात्मना ॥ १११ ॥

पृष्टश्च लङ्कागमनं राक्षसानां च तद्वधम् ।
तत्सर्वं च मया तत्र सीतार्थमिति जल्पितम् ॥ ११२ ॥

अस्याहं दर्शनाकाङ्क्षी प्राप्तस्त्वद्भवनं विभो ।
मारुतस्यौरसः पुत्रो वानरो हनुमानहम् ॥ ११३ ॥

रामदूतं च मां विद्धि सुग्रीवसचिवं कपिम् ।
सोऽहं दौत्येन रामस्य त्वत्समीपमिहागतः ॥ ११४ ॥

शृणु चापि समादेशं यदहं प्रब्रवीमि ते ।
राक्षसेश हरीशस्त्वां वाक्यमाह समाहितम् ।
धर्मार्थकामसहितं हितं पथ्यमिवाशनम् ॥ ११५ ॥

वसतो ऋष्यमूके मे पर्वते विपुलद्रुमे ।

राघवो रणविक्रान्तो मित्रत्वं समुपागतः ॥ ११६ ॥

तेन मे कथितं राजन्भार्या मे रक्षसा हृता ।
तत्र साहाय्यहेतोर्मे समयं कर्तुमर्हसि ॥ ११७ ॥

वालिना हृतराज्येन सुग्रीवेण सह प्रभुः ।
चक्रेऽग्निसाक्षिकं सख्यं राघवः सहलक्ष्मणः ॥ ११८ ॥

तेन वालिनमुत्साद्य शरेणैकेन संयुगे ।
वानराणां महाराजः कृतः सम्प्लवतां प्रभुः ॥ ११९ ॥

तस्य साहाय्यमस्माभिः कार्यं सर्वात्मना त्विह ।
तेन प्रस्थापितस्तुभ्यं समीपमिह धर्मतः ॥ १२० ॥

क्षिप्रमानीयतां सीता दीयतां राघवस्य च ।
यावन्न हरयो वीरा विधमन्ति बलं तव ॥ १२१ ॥

वानराणां प्रभवो हि न केन विदितः पुरा ।
देवतानां सकाशं च ये गच्छन्ति निमन्त्रिताः ॥ १२२ ॥

इति वानरराजस्त्वामाहेत्यभिहितो मया ।
मामैक्षत ततो रुष्टश्चक्षुषा प्रदहन्निव ॥ १२३ ॥

तेन वध्योऽहमाज्ञप्तो रक्षसा रौद्रकर्मणा ॥ १२४ ॥

ततो विभीषणो नाम तस्य भ्राता महामतिः ।
तेन राक्षसराजोऽसौ याचितो मम कारणात् ॥ १२५ ॥

दूतवध्या न दृष्टा हि राजशास्त्रेषु राक्षस ।
दूतेन वेदितव्यं च यथार्थं हितवादिना ॥ १२६ ॥

सुमहत्यपराधेऽपि दूतस्यातुलविक्रमः ।
विरूपकरणं दृष्टं न वधोऽस्तीह शास्त्रतः ॥ १२७ ॥

विभीषणेनैवमुक्तो रावणः सन्दिदेश तान् ।
राक्षसानेतदेवाद्य लाङ्गूलं दह्यताम् इति ॥ १२८ ॥

ततस्तस्य वचः श्रुत्वा मम पुच्छं समन्ततः ।
वेष्टितं शणवल्कैश्च पटैः कार्पासकैस्तथा ॥ १२९ ॥

राक्षसाः सिद्धसंनाहास्ततस्ते चण्डविक्रमाः ।
तदादीप्यन्त मे पुच्छं हनन्तः काष्ठमुष्टिभिः ॥ १३० ॥

बद्धस्य बहुभिः पाशैर्यन्त्रितस्य च राक्षसैः ।
न मे पीडा भवेत्का चिद्दिदृक्षोर्नगरीं दिवा ॥ १३१ ॥

ततस्ते राक्षसाः शूरा बद्धं मामग्निसंवृतम् ।
अघोषयन्राजमार्गे नगरद्वारमागताः ॥ १३२ ॥

ततोऽहं सुमहद्रूपं सङ्क्षिप्य पुनरात्मनः ।
विमोचयित्वा तं बन्धं प्रकृतिष्ठः स्थितः पुनः ॥ १३३ ॥

आयसं परिघं गृह्य तानि रक्षांस्यसूदयम् ।
ततस्तन्नगरद्वारं वेगेनाप्लुतवानहम् ॥ १३४ ॥

पुच्छेन च प्रदीप्तेन तां पुरीं साट्टगोपुराम् ।
दहाम्यहमसम्भ्रान्तो युगान्ताग्निरिव प्रजाः ॥ १३५ ॥

दग्ध्वा लङ्कां पुनश्चैव शङ्का माम् अभ्यवर्तत ।
दहता च मया लङ्कां दग्ध्वा सीता न संशयः ॥ १३६ ॥

अथाहं वाचमश्रौषं चारणानां शुभाक्षराम् ।
जानकी न च दग्धेति विस्मयोदन्तभाषिणाम् ॥ १३७ ॥

ततो मे बुद्धिरुत्पन्ना श्रुत्वा तामद्भुतां गिरम् ।
पुनर्दृष्टा च वैदेही विसृष्टश्च तया पुनः ॥ १३८ ॥

राघवस्य प्रभावेन भवतां चैव तेजसा ।
सुग्रीवस्य च कार्यार्थं मया सर्वमनुष्ठितम् ॥ १३९ ॥

एतत्सर्वं मया तत्र यथावदुपपादितम् ।
अत्र यन्न कृतं शेषं तत्सर्वं क्रियताम् इति ॥ १४० ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com